मुद्राराक्षसचन्द्रगुप्तयोः तुलात्मकमध्ययनम्।

Dr. Ajikumar P V

Associate Professor, Department of Vedanta, Government Sanskrit College , Tripunithura

विषयप्रस्तावः - दृश्यकाव्यप्रभेदाः -

कविकर्मभूते काव्ये दृश्यश्रव्येति द्विधा विभक्ते दृश्यकाव्यप्रभेदं नाटकमाश्रित्य कमपि प्रबन्धमत्र कर्तुमीहे। धनञ्जयेन स्वीयदशरूपके उक्तं[1] - 'अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते। रूपकं तत्समारोपाद्दशधैव रसाश्रयम्।।' रसानाश्रित्यैव रूपकं वर्तते। तच्च दशविधं भवति। यथा[2] - 'नाटकं सप्रकरणं भाणः प्रहसनं डिमः। व्यायोगसमवाकारौ वीथ्यङ्कैहामृगा इति।।'

ख्यातवृत्तं पञ्चसन्धिसमन्वितं नाटकमिति साहित्यदर्पणकारः विश्वनाथः लक्षयामास। तल्लक्षणं च कालिदासादीनाम् अभिज्ञानशाकुन्तलादिनाटकेषु सुष्ठु युज्यते च। लौकिकं कविकल्पितं वा वृत्तमाश्रित्य कृतं शृङ्गारप्रधानं तथा विप्रामात्यवणिक्षवन्यतमनायकं रूपकं भवति प्रकरणम्। मृच्छकटिकमालतीमाधवादिकमत्र निदर्शनम्। धूर्तचरितप्रधानं अवस्थान्तरात्मकं निपुणपण्डितविटेष्वन्यतमनायकं एकाङ्कं रूपकं भवति भाणः, यस्य च लीलामधुकरः निदर्शनम्। ख्यतेतिवृत्तः स्वल्पस्त्रीजनसंयुतः बहुभिर्नैराश्रितः एकाङ्कः अस्त्रीनिमित्तसमरोदयः प्रख्यतराजर्षिनायकः च भवति व्यायोगः। सौगन्धकाहरणमत्र निदर्शनम्। देवासुराश्रयं ख्यातं वृत्तं प्रख्यातद्वादशोदात्तनायकोपेतं वीररसप्रधानं च समवकारः। समुद्रमथनमत्र निदर्शनम्। रौद्ररसप्रधानःमायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः भूयिष्ठः अतिवृत्तकः ख्यातः डिमः यत्र त्रिपुरादाहो दृष्टान्तः। चतुरङ्कोपेतः मिश्रवृत्तकः नरदिव्यादिनायकः ईहामृगः। कुसुमशेखरादिः अत्र दृष्टान्तः। उत्सृष्टिकाङ्कः एकाङ्कः प्राकृतनेत्रुपेतः करुणरसप्रधानः अङ्कः, यस्य शर्मिष्ठाययातिः दृष्टान्तः इथि लक्षणकारः। शृङ्गाररसप्रधानां आकाशभाषितैरपेतां वीथीमाहुः मालविकाग्निमित्रं यस्याश्च दृष्टान्तमिति। कविकल्पितं वृत्तं हास्यरसप्रधानं तपस्विविप्रादिनायकं प्रहसनमिति यस्य च धूर्तचरितं निदर्शनम्।

आस्वादकानां हृदयावर्जकं रूपकप्रभेदमस्ति नाटकम्। सर्वभाषास्वपि अस्य अनुपममस्ति स्थानम्। पञ्चमं वेदमिति वदद्भिः भारतीयैः नाट्याचार्यैः नाटकाय महत्त्वपूर्णं स्थानं प्रदत्तम्। नाट्यशास्त्रानुसारमेव पूर्वविहितरूपकभेदकल्पना अपि कृता। हिन्दीभाषायामपि नाटकानि तदाधारेणैव अङ्कुरितानि पल्लवितानि च। हिन्दीसाहित्यैतिहासिकानां मतानुसारं राजस्थानीयेषु रासनाटकेषु तथा बिहारीयमैथिलीनाटकेषु च हिन्दीनाटकानां बीजावस्थाः दृश्यन्ते। भासादिभिः प्रवर्तितपरम्परायाः संस्कृतनाटकसाहित्यपरम्परागतानां बहूनां हिन्दीभाषानुवादः सञ्जातः, विशिष्य भारतेन्दुयुगस्य प्रारम्भे। संस्कृतहिन्दीभाषासाहित्ययोः प्रतिपाद्यविषयस्य तथा प्रतिपादनशैल्या च पृथक्स्थानमर्हतः विशाखदत्तकृतं मुद्राराक्षसं तथा जयशङ्करप्रसादकृतं चन्द्रगुप्तमौर्य इति नाटकञ्च। अनयोः आधारभूतघटनाः भारतीयेतिहासेन सम्मिलिताः तथा पारतन्त्र्यप्रतिरोधप्रधानाश्च। तुलनात्मकसाहित्याय अनयोः साजात्यवैजात्यचिन्तने मतिः क्रियते।

मुद्राराक्षसस्य परिचयः

प्रदर्शितरूपकविवेकानुसारं मुद्राराक्षसं नाटकविभागेऽन्तर्भवति। कविर्विशाखदत्तः भवति नाटककारः। स्वयं कविना नाटकस्य प्रस्तावनायां - "सामन्तवटेश्वरदत्तपौत्रस्य महाराजपदभाक्पुसूनोः" इति नामोल्लेखात् अस्य क्षत्रियत्वं गम्यते। भारतीयेतिहासे प्रथिता काचिद्घटना भवति - यत्र नन्दवंशमुन्मूल्य चन्द्रगुप्तः मौर्यवंशं संस्थापायामास पाटलीपुत्रराज्ये, यत्र चाणक्यः मुख्यसहायकः। ततश्च कूटनीतिज्ञेन चाणक्येन नन्दामात्यः राक्षसाख्यः मौर्यप्रधानामात्यपदे स्थापितः। सोऽयमितिवृत्तः अस्य नाटकस्य।

संस्कृतनाटकसाहित्ये प्रतिपाद्यप्रतिपादनशैल्या नितरांपार्थक्यं भजते विशाखदत्तमुद्राराक्षसाख्यं नाटकम्। संस्कृतनाटकानि मुख्यतया यत्र नायकनायिकयोः वृत्तं पुरस्कृत्य विकसति तत्रेदं नाटकं राजनीतिप्रधानमिति तस्य पार्थक्यम्। अपि च नाटकेऽस्मिन् नास्त्युल्लेखनीयं स्त्रीपात्रं किमपि नापि कस्यापि प्रणयः विरहो वा। यथा कूटनीतिः फलेनैव ज्ञायते तथैव नाटकस्य लक्ष्यं किमिति अन्ते एव ज्ञायते। नन्दामात्यं शत्रुमिति ख्यापयन् चाणक्यः अन्ते एव स्वहृदयं स्पष्टयति यत् सोऽयं राक्षसः चन्द्रगुप्तामात्यो भवतु इति। नाटकमिदं क्रिस्त्वोः परम् अष्टमशतके लिखितमिति संस्कृतसाहित्येतिहासकाराणाम्मतम्।

चन्द्रगुप्तमौर्यस्य परिचयः -

जयशङ्करप्रसादस्य चन्द्रगुप्तमौर्य इति हिन्दीनाटकमपि चन्द्रदुप्तचाणक्यकथयोः आधारेणैव विकसति। प्रसादयुगीयं हिन्दीसाहित्यम् अनुवाचकान् स्वीयैतिहासिकतां प्रति उत्तेजयति इति तदीयमहत्त्वम् - इति ऐतिहासिकानाम्मतम्। तादृशमेकमस्तीदं नाटकम्। विंशतितमे शतके नाटकमिदं रचितम्। कालोऽयं भारते पारतन्त्र्यप्रतिरोधस्य। अत अव स्वीयैतिहासिकपरम्परया जनान् उत्तेजयितुमस्ति नाटककारस्य प्रयत्नः। विदेशीयैः भारतीयानां सङ्घर्षस्य तथा विजयस्य च चित्रणमत्र लभ्यते। मौर्यवंशसामाज्यसंस्थापकस्य चन्द्रगुप्तस्य कथात्र नाटकरूपेण प्रस्तुता। मौर्योदयेन सहैव मागधनन्दस्य पतनं, चाणक्यनीतेः परीक्षा, राष्ट्रहिते स्वसमर्पणमित्यादि बहुतथ्यानि अत्र समायोजितानि। सहैवात्र अलक्सैण्डरस्य चरितमपि योजितम्। नाटकेऽस्मिन् प्रेम्णः राष्ट्रीयैकतायाः अपि चित्रणमुपलभ्यते[3]। पात्रचित्रणदृष्ट्या नाटकयोः तुलना लक्ष्यभूते नाटके इदानीं प्रदर्शिते। अनयोः साजात्यवैजात्यशोधनमत्र चिकीर्षितं यदर्थमथ मतिः क्रियते। पात्रचित्रणदृष्ट्या नाट्यशास्त्रविवेचनेन च अत्र प्रयत्नः भवति।

मुद्राराक्षसं राजनैतिकतायाः अन्तःसङ्घर्षैः विकसितं भवति। प्रथममेव सूत्रधारनटीसंवादे एव अस्य सूचना लभते- सूत्रधारप्रस्तावे - 'क्रूरग्रहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम्। अभिभवितुमिच्छति बलात् ..... इत्यर्द्धोक्ते - (नेपथ्ये) आः क एष मयि स्थिते चन्द्रमभिभवितुमिच्छति बलात्[4]' - इति श्रूयते। नाटकें भविष्यदन्तःसङ्घर्षाः अनेनैव सूचिताः। चन्द्रदुप्तस्य राजपदप्रतिष्ठायाः परवर्तिघटनाः अत्र योजिताः यत्र राक्षसविजयः लक्षितः।

किन्तु हीन्दीनाटकस्य वातावरणं तावत्कूटनीतिकलुषितं न। नाटकप्रारम्भ एव राष्ट्रप्रेम्णः भावमादर्शयति सहैव कामपि प्रणयकथाञ्च। नात्र पात्राणां भाषणे तावन्नाटकीयता अस्ति। नाटकमिदं ग्रीक्सेनायाः भारताधिनिवेशात्परवर्तिघटनाभिः प्रारभ्यते। तक्षशिलीयगुरुकुले यत्र राष्ट्ररक्षणाय कृतप्रतिज्ञाः चन्द्रगुप्तमालवीयचाणक्याः मगधं प्रतिष्ठन्ते, गान्धारस्य पञ्चनदनरेशेन विरोधात् अलक्साण्डरेण सन्धिः च

सूचिताः। साक्षात् तात्कालिकचरितस्य चित्रणमत्र प्रवर्तते। कूटनीत्याधारितमपि चित्रणे तावत्कूटता नोपलक्ष्यते इति भेदः।

अधुना नाटकयोः पात्राणां चित्रणे दृष्टं साम्यवैषम्ये परीक्ष्येते। नाटकद्वयेऽपि चन्द्रगुप्त-चाणक्य-राक्षसाः समानाः दृश्यन्ते। तावता एव पात्राणां साम्यञ्च। मुद्राराक्षसस्य मुख्यं लक्ष्यं राक्षसस्य मौर्यामात्यप्रतिष्ठापनमिति पूर्वमेवोक्तम्। तदर्थं नीतीः चाणक्यः चालयति इति कथागतिनियन्तृत्वेन चाणक्योऽत्र नायकः। चाणक्यशिष्यः चन्द्रगुप्तः गुरुप्रदर्शितपथिकोऽपि हिन्दीनाटके तस्यैव नायकभावः।

स्त्रीपात्राणि संस्कृतहिन्दीनाटकयोः -

संस्कृतहिन्दीनाटकयोः स्वरूपतः कथागत्या चेमौ – स्त्रीपात्राणां भावाभावौ भेदहेतू। मुद्राराक्षसे चतस्र एव स्त्रियः पात्रताङ्कृताः – द्वारपालिके, श्रेष्ठिनः भार्या, तथा नटी च। आसां च नाटके उल्लेखार्हं किमपि प्राधान्यं नोपलक्ष्यते। तात्कालिकराजनीतौ स्त्रीणां तावत्प्राधान्यं नासीदित्यपि अत्र स्त्रीपात्रदौर्लभ्ये हेतुः स्यात्। नायिका इति पात्रस्याभावः अत्र सर्वथा भवति। किन्तु हिन्दीनाटके सोऽयमभावः नोपलक्ष्यते। प्रथमाङ्कादेव स्त्रीपात्राणि अत्र लक्ष्यन्ते। तक्षशिलायाः राजकुमारी, मगधराजकुमारी, सिन्धुदेशस्य राजकुमारी, चन्द्रगुप्तस्य माता, ग्रीक् देशीयाः कन्यकाः तथा राजकुमारीणां सख्यश्चात्र पात्राणि। न केवलं नामतः उल्लेखाय किन्तु स्वीयव्यक्तित्वेन च एताः नाटके स्वीयं स्थानं भजन्ते। यथा गन्धारराजकुमारः आम्भीकः गुरुकुलमागत्य अविनयं करोति तदा तद्भगिनी अलका मालवीये सिंहणे अनुरक्ता अपि राष्ट्रहिताय ओतप्रोता लक्ष्यते। हिन्दीनाटके इयमपि विशेषता दृश्यते यदत्र स्त्रीपात्राणि राष्ट्रभक्त्या प्रेरिताः स्वदेशीयात्याचारैः दुःखिताश्च। अधिकतया पुरुषाः तात्कालिकलाभेच्छवः जनविरुद्धाश्च लक्ष्यन्ते। एकैकशः स्त्रीपात्राणां दृष्टान्ताःअत्र प्रदर्श्यन्ते

अलका -

गान्धारराजकन्या अलका – भ्रातरम् आम्भीकं पञ्चनदेश्वरे पर्वतेश्वरे क्रुद्धं सन्तं ग्रीकसैन्यं राष्ट्रमामन्त्रयन्तं दृष्ट्वा चाणक्यस्य सहायेन राजगृहं त्यक्त्वा मालवीयेन सिंहणकेन सह गच्छति, विदेशीयानां प्रतिरोधाय यतते च। सिंहणे अनुरक्ता अपि सा विदेशीयेभ्यः राष्ट्ररक्षणं मुख्यं मन्यते। पुत्रवात्सल्यादन्धं गान्धारनरेशं वृद्धम् अन्ते

सैव पालयति रक्षति च। एवं पुत्रापेक्षया पितृपालनधर्मे अपि पुत्र्याः सामर्थ्यं सा प्रदर्शयति। यावच्चन्द्रगुप्तसैन्यं ग्रीक्सैन्यप्रतिरोधे समर्थं भवति तावत्सा सैनिककर्म अनुतिष्ठति, स्वतन्त्रतायै जनानुत्तेजयन्ती च लक्ष्यते।

कल्याणी-

मगधराजकुमारी। सा पितुः नन्दस्य दुरितदायकजनशासनेन असन्तुष्टा तथा ग्रीक्सैन्यप्रतिरोधाय सन्नद्धा च। पर्वतेश्वरेण एकदा तिरस्कृता अपि सा ग्रीक्सैन्यप्रतिरोधाय युद्धे पञ्चनदसैन्येन सह भागं गृह्णाति तथा पितरि नन्दे मृते उपागतमुन्मत्तं पर्वतेश्वरं हत्वा आत्मत्यागमपि करोति। स्वाभिमानरक्षणेन स्वचरित्रं सा रक्षति।

सुवासिनी

नाटकान्ते राक्षसपत्नी जायते किन्तु चाणक्यनीतेः सहायकरूपेण तस्याः चित्रणं भवति। कोर्णेलियेति ग्रीक्सेनापतेः सिल्यूकसस्य पुत्री या अन्ते चाणक्यनीतेः परिणामतः चन्द्रगुप्तस्य पत्नी जायते, सा भारतीयसंस्कृतौ दर्शने च श्रद्धालू लक्ष्यते।

मुद्राराक्षसं यत्र स्त्रीपात्राणां योजने विमुखं दृश्यते तत्र चन्द्रगुप्तमौर्ये स्त्रियः कथाविकासे फलोदये च योगदानं कुर्वन्ति। स्वतन्त्रतासङ्ग्रामवेलायां रचितमिति नाटककारः सर्वान् तत्रापि विशिष्य स्त्रीः स्वतन्त्रतायै सज्जयितुं कृतनिश्चयः लक्ष्यते। 'हिमाद्रितुंगशृङ्ग से' इति प्रसिद्धं हिन्दीगीतं नाटके अस्मिन् अलकया प्रयुक्तं राष्ट्रस्नेहोज्वलनायैति निर्वितर्कम्।

पात्रचित्रणशैल्या अपि नाटकद्वयं नितरां भिद्यते। मुद्राराक्षसे मुख्यपात्रं भवति चाणक्यः। तदीयभाषणैराचरणैः वा कदापि तद्धृदयं न स्पष्टम्। कूटनीतिज्ञस्य चाणक्यस्य पात्रचित्रणे विशाखदत्तः नितरां समर्थः। किन्तु जयशङ्करप्रसादस्य चाणक्यः स्वसंभाषणैः चिकीर्षितमुद्घाटयति। कदापि तस्य आचरणं तथा गूढं न लक्ष्यते यथा संस्कृतनाटके। हिन्दीनाटके कूटनीतिज्ञं चाणक्यं सामान्यमनुष्यरूपेण प्रस्तोतुं यत्नः दृश्यते। कुत्रचित् सः वदति – 'मुझे क्रूर बनना है ' - मया कठिनतया भाव्यमिति । एकत्र बाल्यसखीं सुवासिनीमिच्छन्नपि लक्ष्यते सः।

एतत्सर्वं नाटकस्य मुख्यलक्ष्यनिर्वहणे अनावश्यकञ्च। तत्र संस्कृतनाटके तादृशं किमपि दृश्यं नोपलक्ष्यते यत् नाटकस्य निर्दिष्टसमाप्तौ नोपयोगी सेत्स्यति।

नाटकद्वये समानता केवलैतिहासिकांशस्वीकारे एवेति पूर्वं सूचितम्। यत्र हिन्दीनाटकं ग्रीक्सैन्यप्रतिरोधे तात्कालिकैः कृतयत्नेभ्यः आरभ्य चन्द्रगुप्तस्य परिणयं यावदंशैः पूर्णं भवति तत्र संस्कृतनाटकं राज्ञः चन्द्रगुप्तस्य अमात्यपदे राक्षसप्रतिष्ठापनसंबन्धिघटनाभिः संबद्धाः याश्च हिन्दीनाटके न तावत्प्राधान्येन चित्रिताः। चन्द्रगुप्तचाणक्ययोः चरितमिति समानतां विहाय नास्ति नाटकयोः नान्यत्साम्यम्।

क्रिस्त्वोः परमष्टमशतके विरचितं संस्कृतनाटकं तावदनुवर्तितसंस्कृतनाटकशैलीम् उल्लङ्घ्य राजनीतिं मुख्यतया प्रत्यपादयत्। हिन्दीनाटकं विंशतितमशतकस्य प्रारम्भे रचितं यदा भारते स्वतन्त्रतान्दोलनं प्रावर्तत। जनान् राष्ट्रहिताय प्रेरणं साहित्यस्य धर्मो जातः यश्च अत्र सुष्ठु अनुष्ठितः। सोद्देश्यसाहित्यश्रेण्यां गणनीयं भवति हिन्दीनाटकम्।

नैतावता चन्द्रगुप्तमौर्यनाटकस्य प्राधान्यं समाप्तिमेति यदयमन्यः कश्चन कालिकप्रसक्तसन्देशः अत्र गुम्फितो वर्तते। नाटकमिदं तक्षस्थलाख्यविद्यास्थाने विकसति। स्वयं चाणक्यः तत्र आचार्यः। चन्द्रगुप्तसिंहणादयः तत्र छात्राः। गान्धारनरेशः यदा स्वराष्ट्रस्य द्वाराणि वैदेशिकेभ्यः उद्घाटयति तदा तत्र समस्तराष्ट्रस्य अहितं ज्ञात्वा चाणक्यः तद्विरोधितया छात्रान् प्रेरयति। विद्यास्थानं राष्ट्रहिताय अत्र प्रवर्तते। छात्राः राष्ट्रस्वतन्त्रतायै आन्दोलनं कुर्युरिति महात्मागान्धिनो आह्वानमप्यत्र श्रद्धेयमस्ति। सहैव इदमपि श्रद्धेयं यच्चिकीर्षितस्य पूर्तौ चाणक्यः राजनैतिकतातः स्वयं निवर्तते। अध्यापकः मर्गनिर्देशं करोति। लक्ष्यं यावच्छात्रैः सह वर्तते। लक्ष्यं राष्ट्रहितमेव, न तु वैयक्तिकम्। यदा राक्षसः मौर्यामात्यः सम्पद्यते तत एव चाणक्यः तक्षशिलां निवर्तते। संस्कृतहिन्दीनाटकयोः पर्यवसाने इयं समानता द्रष्टव्या। अध्यापकस्य मुख्यं कर्म अध्यापनमिति सन्देशो अपि अत्र वर्तते। यदा राष्ट्राय अहितं जायते तदा तत्प्रतिरोधे राष्ट्ररक्षणे च अध्यापकः न पराङ्मुखः। अर्थात् राजपालकः यदा स्वकर्तव्यं विस्मरति तदा आचार्यः तं बोधयति, सुपथं चालयति।

अथ नाटकयोः अनयोः नाट्यशास्त्रीयदृष्ट्या परीक्ष्येत तर्हि वीररसप्रधानं संस्कृतनाटकं तदनुगुणपात्रैः घटनाभिश्च प्रयुक्तमिति निस्संशयं ज्ञायते। वीररसप्रधानामपि कथां सामाजिकघटनाभिः सम्मेल्य जनान् कर्तव्यं बोधयति हिन्दीनाटकम्। किन्तु हिन्दीनाटके तावद्रहस्यात्मकता न रक्षिता दृश्यते या गूढस्वभावपात्राणां चाणक्यादीनां योजने अनिवार्यमासीत्। कदाचित् नाटककारः स्ववातावरणेन प्रभावितः तावद्रहस्यात्मकतामनिवार्यां न अमन्यतेत्यपि वक्तुं शक्यते।

उपसंहारः

सर्वथापि कथानकमेकमवलम्बितयोः अनयोः नाटकयोः तुलनात्मकमध्ययनं द्वित्रिकार्याणि मुख्तया प्रदर्शयति। यथा[1]अनुवर्तितसंस्कृतनाटकसरण्याः पार्थक्यं भजते मुद्राराक्षसं कथांशचयनेन तथा प्रतिपादनरीत्या च। कूटनीतेः मूढात्मकता सदा संरक्षिता लक्ष्यते तत्र।[2] प्रवर्तमानराजनैतिकवातावरणे सर्वानपि सस्त्रीकान् जनान् उत्तेजयति तथा तदर्थं स्वयोगदानं कर्तुं च प्रेरयति हिन्दीनाटकम्। स्वतन्त्रतैव अत्र लक्ष्यम् यदर्थं जनान् उत्तेजयितुं स्वीयमैतिहासिकं गौरवं प्रदर्शयति। [3]एकमेव कथांशं कथं भिन्नरीत्या भिन्नप्रयोजनाय प्रतिपादयितुं शक्यते इत्यस्य निदर्शने इमे नाटके इत्यमपि अध्ययनादस्मात् लभते।

पादटिप्पणी

[1] दशरूपकं धनिककृतव्याख्योपेतं, प्रथमः प्रकाशः श्लोकसङ्ख्या 7 – इन्टर्नेट् आर्कैव्स्

[2] तत्रैव श्लोकसङ्ख्या -8

[3]चन्दर्गुप्तनाटक –विकीपीडिया – प्रसादजी की नाट्यरचनाएँ –(www.raj-bhasha-hindi.blogspot.in/2011/08/blog-post) (राजभाषा हिन्दी)

[4] मुद्राराक्षसम् – प्रथमोऽङ्कः पुटसङ्ख्या -1